घृत से चौगुने ब्राह्मी रस में घी को पकावे । जब मात्र घृत शेष रह जावे तब इस मन्त्र से जप कर उस बासी घृत को नित्य प्रातःकाल पीता रहे । ऐसा करने से साधक अजस्र प्रवाहित होने वाली सालङ्कार कविता प्राप्त करता है ।

वह साधक शीघ्र ही समस्त वेद और आगमों का व्याख्याता हो जाता है । ज्ञान के ऐश्वर्य को प्रदान करने के लिये इस मन्त्र के समान और कोई दूसरा मन्त्र नहीं है ॥ ७९-८० ॥

रामन्त्रः

**अनन्तोऽग्न्यासनः सेन्दुर्बीजं रामाय हृन्मनुः ।**
**षडक्षरोऽयमादिष्टो भजतां कामदो मणिः ॥ ८१ ॥**

ऋष्यादिकथनम्

**ब्रह्मा प्रोक्तो मुनिश्छन्दो गायत्रं देवता मनोः ।**
**देशिकेन्द्रैः समाख्यातो रामो राक्षसमर्दनः ॥ ८२ ॥**
**दीर्घभाजा स्वबीजेन कुर्यादङ्गानि षट् क्रमात् ।**
**ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृन्नाभ्यन्धुषु पादयोः ।**
**षडक्षराणि विन्यस्येन्मन्त्रस्य मनुवित्तमः ॥ ८३ ॥**

राममन्त्रमाह अनन्त इति । अनन्त आकारः अग्न्यासनो रेफासनः सेन्दुः सबिन्दुः । बीजमित्यनेनैकाक्षरोऽप्ययं मन्त्र इति सूचितम् । तदुक्तम्—

वह्निस्थं शयनं विष्णोरर्धचन्द्रविभूषितम् ।
एकाक्षरो मनुः प्रोक्तो मन्त्रराजः सुरद्रुमः ॥ इति ।

अस्यर्ष्यादिकं सर्वं वक्ष्यमाणमेव । एतदर्थ उक्तः स्कन्दयामले निर्वाणखण्डे—

रेफोऽग्निरहमेवोक्तो विष्णुः सोमो म उच्यते ।
मध्यगस्त्वावयोर्ब्रह्मा रविराकार उच्यते ॥
ज्योतींषि कवलीकृत्य त्रीण्याकाशो विभुः स्वयम् ।
नादोऽभिधत्ते सन्मात्रं त्वमेव परमेश्वरम् ॥ इति ।

रामाय हृदित्यनेनाऽयं पञ्चाक्षरोऽपि मन्त्र इत्युक्तम् । यदाहुः—

सप्रतिष्ठौ रमौ वायुर्हृत् पञ्चार्णो मनुः स्मृतः ।
विश्वामित्रो मुनिः प्रोक्तः पङ्क्तिश्छन्दोऽस्य देवता ॥
रामभद्रो बीजशक्ती प्रथमार्णनती क्रमात् ।
भ्रूमध्ये हृदि नाभ्यन्धुपादयोर्विन्यसेन् मनुम् ॥
षडङ्गं पूर्ववद्यद्वा पञ्चार्णैर्मनुनाऽस्त्रकम् ।
मध्ये वनं कल्पतरोर्मूले पुष्पलताकुलम् ॥
लक्ष्मणेन प्रगुणितमक्ष्णः कोणेन सायकम् ।
अवेक्ष्यमाणं जानक्या धृतव्यजनयेश्वरम् ॥

जटाभारलसच्छीर्षं श्यामं मुनिगणावृतम् ।
लक्ष्मणेन धृतच्छत्रमथवा पुष्पकोपरि ॥
दशास्यमथनं प्राग्वत् ससुग्रीवविभीषणम् ।
विजयार्थी विशेषेण वर्णलक्षं जपेन्मनुम् ॥ इति ।

मनुरिति । एवं मिलित्वा मन्त्रः षडक्षर इत्यर्थः । कामदो मणिश्चिन्तामणिरित्यनेनास्य विनियोगं वदता स्वबीजं विनापि बहुप्रकारं षड्वर्णत्वं बहुप्रकारं च सप्तवर्णत्वं सूचितम् । तदुक्तं स्कन्दयामले निर्वाणखण्डे—

विश्वरूपस्य ते नाम विश्वे शब्दादि वाचकाः ।
तथापि मूलमन्त्रस्ते विश्वेषां बीजमक्षयम् ॥
मुक्तये प्रणवाद्योऽयं रमादिरपि भुक्तये ।
वाग्भवादिस्तु वाक्सिद्ध्यै मायादिरखिलेष्टदः ॥
अखिलोऽयं महाशक्तिर्मन्त्रचिन्तामणिर्विभो । इति ।

अन्यत्र— स्वकामशक्तिवाग्लक्ष्मी ताराद्यः पञ्चवर्णः ।
षडक्षरः षड्विधः स्याच्चतुर्वर्गफलप्रदः ॥
पञ्चाशन्मातृकामन्त्रवर्णप्रत्येकपूर्वकः ।
लक्ष्मीवाग्मन्मथादिश्च तारादिः स्यादनेकधा ॥
श्रीमायामन्मथैकैक बीजाद्यन्तगतो मनुः ।
चतुर्वर्णः स एव स्यात् षड्वर्णो वाञ्छितप्रदः ॥
स्वाहान्तो हुंफडन्तो वा नत्यन्तो वा भवेदयम् ।
ब्रह्मा समोहनः शक्तिर्दीक्षिणामूर्त्तिरेव च ॥
अगस्त्यः श्रीशिवः प्रोक्ता मुनयोऽत्र क्रमादिमे ।
छन्दो गायत्रसंज्ञं च श्रीरामश्चैव देवता ॥
अथवा कामबीजादेर्विश्वामित्रो मुनिर्मनोः ।
छन्दो देव्यादि गायत्री रामभद्रोऽस्य देवता ॥

बीजशक्ती यथापूर्वम् । इति । राक्षसमर्दनः इति विशेषणं विधेयम् । रां बीजं नमः शक्तिः । तदुक्तं शौनककल्पे—

जानीयात्प्रथमं वर्णं बीजं शक्तिं नतिं तथा । इति ।

केचन आयेति शक्तिमाहुः । दीर्घभाजा षड्दीर्घभाजा । स्वबीजेन मन्त्राद्यबीजेन। क्रमादित्यनेन षड्वर्णैर्वा षडङ्गमित्युक्तम् । यदाहुः—

बीजैः षड्दीर्घयुक्तैर्वा मन्त्रार्णैर्वा षडङ्गकम् । इति ।

अन्थु गुह्यम् । मनुवित्तम इत्यनेनैतदुक्तं भवति । पञ्चाक्षरे पादन्यासः । सप्ताक्षरे ब्रह्मरन्ध्रभ्रूमध्यकण्ठहृन्नाभिगुह्यपादेषु न्यासः । द्व्यक्षरे ब्रह्मरन्ध्रहृदोः । त्र्यक्षरे गुह्यान्तयोः । चतुरक्षरे गुह्यपादान्तयोरिति ॥ ८१-८३ ॥

अब **राममन्त्र का उद्धार** कहते हैं—बिन्दु और आकारयुक्त रेफ इस प्रकार 'राँ', इस बीजाक्षर से युक्त 'रामाय' पद, तदनन्तर हृत् (नमः) पद—इस प्रकार

'राँ रामाय नमः' यह छः अक्षरों का राम मन्त्र बनता है । जो भजन करने वाले को चिन्तामणि के समान फल प्रदान करता है ॥ ८१ ॥

इसके ऋषि ब्रह्मदेव हैं, गायत्री छन्द है और आचार्यों ने इस मन्त्र के देवता राक्षस मर्द्दन राम को कहा है ॥ ८२ ॥

दीर्घ (आ, ई, ऊ, ऐ, औ, अः) वर्णों से युक्त बीजमन्त्र से ब्रह्मरन्ध्र, भ्रूमध्य, कण्ठ, हृत्, नाभि, गुह्य एवं दोनों पैरों में षडङ्गन्यास करे । यथा—आं राँ इति हृदि, ईं राँ इति शिरसि इत्यादि ॥ ८३ ॥

**विमर्श**—मनुवित्तमः का अर्थ है पाँच अक्षस से पादन्यास, सात अक्षर से ब्रह्मरन्ध्र आदि में, दो अक्षर से ब्रह्मरन्ध्र और हृदय में, तीन अक्षरों में गुह्यान्त में, चार अक्षरा से गुह्य औरर पादान्त में न्सास करना चाहिए ।

ध्यानम्

**कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासितं**
**मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।**
**सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं**
**पश्यन्तीं मुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं भजे ॥ ८४ ॥**

**ध्यानमाह कालेति । वीरासनमन्त्ये वक्ष्यति । ज्ञानमुद्रालक्षणं प्राक् । अपरं वामम् । राघवं पश्यन्तीं पार्श्वगतां सीताञ्च भजे इति सम्बन्धः । अस्मिन् पाठे वक्ष्यमाणसीतामन्त्रस्यापि ध्यानमुक्तं भवति । क्वचित्पश्यन्तमिति पाठः । तदा सीतां पश्यन्तं राघवं भजे इति सम्बन्धः । उक्तञ्च—**

**वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभम् । इति । आकल्पो भूषा । अत्र ध्यानानन्तरं नारायणाष्टाक्षरोक्तां गरुडमुद्रां च दर्शयेत् ॥ ८४ ॥**

अब **इस मन्त्र का ध्यान** कहते हैं—काले काले बादलों की कान्ति के समान मनोहर जिनका अङ्ग हैं, जो निरन्तर वीरासन से बैठे हुये है, एक हाथ से ज्ञानमुद्रा तथा दूसरा हस्त कमल जो अपने जानु मण्डल पर रखे हुये हैं । वाम पार्श्व में विद्यमान विद्युच्छटा युक्त श्री सीता हाथों में कमल लिये जिन राघव की ओर निरन्तर निहार रही हैं ऐसे मुकुट अङ्गदादि विविध आभूषणों से भूषित, जाज्वल्यमान शरीर वाले राघव का मैं भजन करता हूँ ॥ ८४ ॥

पुरश्चरणादिकथनम्

**वर्णलक्षं जपेन्मन्त्रं दशांशं कमलैः शुभैः ।**
**जुहुयादर्चिते वह्नौ ब्राह्मणान् भोजयेत्ततः ॥ ८५ ॥**

**वर्णलक्षं षट्लक्षम् । अर्चिते वह्नाविति रामपीठं वह्नावावाह्येत्यर्थः ॥ ८५ ॥**

इस मन्त्र का छः लाख जप करे । उसका दशांश, पूजित अग्नि में श्रेष्ठ कमलों से हवन करे । तदनन्तर ब्राह्मण भोजन करावे ॥ ८५ ॥

पूजयेद्वैष्णवे पीठे मूर्त्तिं मूलेन कल्पयेत्।
श्रीं सीतायै द्विठान्तेन सीतां पार्श्वगतां यजेत् ॥ ८६ ॥

श्रीं सीतायै स्वाहा इति । अयं स्वतन्त्रोऽपि मन्त्रः ।

तदुक्तम्—सीतामन्त्रोऽपि कथितः स्वतन्त्रोऽङ्गपरोऽपि च । इति ।

स्कन्दयामले निर्वाणखण्डेऽपि—

ब्रह्मा गृणाति त्वच्छक्तिं देवीं वाचं त्वदाप्तये ।
विष्णुर्ध्यायति त्वामेव सुषुम्णां पारमेश्वरीम् ॥
सीतामुपास्ते व्योमान्तरीश्वरो बिन्दुरूपिणीम् ।
सदाशिवो नादमयीं खातीतामुन्मनीं शिवः ॥ इति ।

अस्यर्थ्यादिकमगस्तिसंहितोक्तं यथा—

जनकोऽस्य ऋषिश्छन्दो गायत्रं देवता मनोः ।
सीता भगवती प्रोक्ता श्रीबीजं शक्तिरन्तजौ ॥
दीर्घस्वरयुजाद्येन षडङ्गानि प्रकल्पयेत् ।
पूजयेद्वैष्णवे पीठे ध्यायेद्राघवसंयुताम् ॥
सुवर्णाभाम्बुजकरां रामालोकनतत्पराम् ।
वर्णलक्षं जपेन्मन्त्रमिष्टार्थान् साधयेत्ततः ॥ इति ॥ ८६ ॥

वैष्णव पीठ पर मूल मन्त्र से मूर्त्ति की कल्पना कर रामभद्र का पूजन करे । तदनन्तर साधक 'श्री सीतायै स्वाहा' इस मूल मन्त्र से पार्श्वस्थित, श्री सीता की पूजा करे ॥ ८६ ॥

अग्रे पार्श्वद्वये शार्ङ्गं शरानङ्गानि तद्बहिः।
हनूमन्तं ससुग्रीवं भरतं सविभीषणम् ॥ ८७ ॥
लक्ष्मणाङ्गदशत्रुघ्नान् जाम्बुवन्तं दलेष्विमान् ।
वाचयन्तं हनूमन्तमग्रतो धृतपुस्तकम् ॥ ८८ ॥
यजेद्भरतशत्रुघ्नौ पार्श्वयोर्धृतचामरौ ।
धृतातपत्रं हस्ताभ्यां लक्ष्मणं पश्चिमे यजेत् ॥ ८९ ॥
सृष्टिं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम् ।
अकोपं धर्मपालाख्यं सुमन्त्रं च दलाग्रतः ॥ ९० ॥
सर्वाभरणसम्पन्नान् लोकेशानर्चयेत्ततः।
तदस्त्राणि ततो बाह्ये वज्रादीनि प्रपूजयेत् ॥ ९१ ॥
एवं पूजादिभिः सिद्धे मनौ कर्म्माणि साधयेत् ।
जातीप्रसूनैर्जुहुयाच्चन्दनाम्भःसमुक्षितैः ॥ ९२ ॥
राजवश्याय कमलैर्धनधान्यादिसम्पदे ।
नीलोत्पलानां होमेन वशयेदखिलं जगत् ॥ ९३ ॥

बिल्वप्रसूनैर्जुहुयादिन्दिरावाप्तये नरः ।
दूर्वाहोमेन दीर्घायुर्भवेन्मन्त्री निरामयः ॥ ९४ ॥
रक्तोत्पलहुतान्मन्त्री धनमाप्नोति वाञ्छितम् ।
मेधाकामेन होतव्यं पलाशकुसुमैर्नवैः ॥ ९५ ॥
तज्जप्तमम्भः प्रपिबेत्कविर्भवति वत्सरात् ।
तन्मन्त्रितान्नं भुञ्जीत महदारोग्यमाप्नुयात् ॥ ९६ ॥

अग्रे पार्श्वद्वय इति व्यधिकरणे सप्तम्यौ । तेनाग्रे पुरतः पार्श्वद्वये वामदक्षिण-पार्श्वयोः शार्ङ्ग शरानिति सम्बन्धः । अनेनैतावत्पर्यन्तं मुख्यपूजेत्युक्तम् । उक्तञ्च—

वामपार्श्वे त्रिकोणस्य शार्ङ्गं दक्षिणके शरान् ।
शं शार्ङ्गाय नमोऽस्त्वेवं शं शरेभ्यो नमोऽस्त्विति ॥
पूजानुज्ञां ततो लब्ध्वा रश्मीनङ्गान्यथो यजेत् । इति ।

पूजायन्त्रं तु तन्त्रान्तरोक्तं यथा—

भूगृहाष्टकपत्रान्तः षट्कोणमतिसुन्दरम् ॥ इति ।

अत्रैव वक्ष्यमाणं धारणयन्त्रं वा । तदुक्तमगस्तिसंहितायाम्—

षट्कोणादि धरण्यन्तं पूर्ववद्विलिखेदथ ।
तस्य मध्ये लिखेत्तारं षट्सु कोणेष्वपि क्रमात् ॥
मूलमन्त्राक्षराण्येव सन्धिष्वङ्गं च मान्मथम् ।
मायां गण्डेषु किञ्जल्के स्वराणां लेखनं मतम् ॥
पत्रेषु पूर्ववन् मालामन्त्रो लेख्यः क्रमेण हि ।
दशाक्षरेण संवेष्ट्य काद्यानि व्यञ्जनानि च ॥
दिग्विदिक्षु लिखेद्बीजे नरसिंहवराहयोः ।
एतद्यन्त्रान्तरं चात्र साङ्गावरणमर्चयेत् ॥
सौवर्णे राजते भूर्जे लिखित्वाऽर्चनमारभेत् । इति ।

अङ्गानि तद्बहिरिति आग्नेयादि षट्सु कोणेषु ॥

तदुक्तम्— इष्ट्वाङ्गदेवताः षट्कोणेष्वग्निकोणादि । इति ।

अन्यत्रापि— षट्कोणे प्रथमावृत्तिः स्यादङ्गैरग्निनतः क्रमात् । इति ।

पश्चिमे देवपृष्ठभागे । अत्र हनूमन्तमित्यादि प्रथममुद्दिश्य पश्चाद्वाचयन्त-मित्यादिना यत्प्राधान्येन चतुर्णां सध्यानं पूजनमाह । तेनैषां चतुर्णां मन्त्रा अपि प्रधानभूता इत्यपि सूचितम् । यदगस्तिसंहितायाम्—

आञ्जनेयमनुं वक्ष्ये भुक्तिमुक्त्येकसाधनम् ।
प्रकाशितं शङ्करेण लोकानां हितकाम्यया ॥
भूतप्रेतपिशाचादिडाकिनीब्रह्मराक्षसाः ।
दृष्ट्वाऽथ प्रपलायन्ते मन्त्रानुष्ठाननत्परम् ॥
प्रधानश्चाऽङ्गभूतोऽयं मन्त्रराजो ह्यनुत्तमः ।

पूर्वं नमः पदञ्चोक्त्वा ततो भगवते पदम् ॥
आञ्जनेयपदं ङेऽन्तं महाबलपदं तथा ।
वह्निजायान्त एव स्यान् मन्त्रो हनूमतः परः ॥
सर्वसिद्धिकरः प्रोक्तो मन्त्रश्चाऽष्टादशाक्षरः ।
ऋषिरीश्वर एव स्यादनुष्टुप् छन्द उच्यते ॥
हनूमान् देवता प्रोक्तो हं बीजं शक्तिरन्तजौ ।
हनूमत्प्रीणनं चैव फलमाद्यमुदाहृतम् ॥
नमो भगवते चाञ्जनेयायाऽङ्गुष्ठयोर्न्यसेत् ।
रुद्रमूर्त्तय इत्येवं तर्जनीभ्यामनन्तरम् ॥
वायुसुतायाऽपि तथा मध्यमाभ्यामपि स्फुटम् ।
अग्निगर्भाय च तथाऽनामिकाभ्यां प्रविन्यसेत् ॥
रामदूताय च पुनः कनिष्ठाभ्यां विचक्षणः ।
ब्रह्मास्त्रवारणार्थाय चाऽस्त्रमन्त्रः समीरितः ॥
एवं षडङ्गं च मुने कृत्वा ध्यायेदनन्यधीः ।
स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम् ॥
कुण्डलद्वयसंशोभिमुखाम्भोजं मुहुर्मुहुः ।
अयुतं तु पुरश्चर्या रामस्याग्रे शिवस्य वा ॥
पूजां तु वैष्णवे पीठे शैवे वा विदधीत वै ।
आवृतिभिर्विना नित्यं नक्ताशी विजितेन्द्रियः ॥ इति ।
रेफपूर्वं समुद्धृत्य बिन्दुलक्ष्मणसंयुतम् ।
ङेऽन्तोऽयं लक्ष्मणमनुर्नमसा च समन्वितः ॥
अगस्त्य ऋषिरस्याऽथ गायत्रं छन्द उच्यते ।
लक्ष्मणो देवता प्रोक्तो लं बीजं शक्तिरस्य हि ॥
नमस्तु विनियोगो हि पुरुषार्थचतुष्टये ।
दीर्घभाजा स्वबीजेन षडङ्गानि प्रकल्पयेत् ॥
द्विभुजं स्वर्णरुचिरं तनुं पद्मनिभेक्षणम् ।
धनुर्बाणकरं रामसेवासंसक्तमानसम् ॥
पूजापि वैष्णवे पीठे साङ्गावरणवर्जिते ।
सप्तलक्षं पुरश्चर्या ततः सिद्धस्तु साधयेत् ॥
भरतस्यैवमेव स्याच्छत्रुघ्नस्याऽप्ययं विधिः ।
अङ्गत्वेनोदिता ह्येते प्राधान्येनापि सम्मताः ॥
आदौ वाऽप्यन्ततो वापि पूजायां राघवस्य तु ।
एतेषामपि कर्त्तव्या पूजा भुक्तिफलेप्सुभिः ॥
प्राधान्येन पृथक्त्वेन अङ्गत्वे रामपीठके ।
लक्ष्मणस्तु सदा पूज्यः प्राधान्येनैव नित्यशः ॥
यथा रामस्य पूजा स्यात्तथा तस्यापि नित्यशः ॥
साफल्यं रामपूजाया यदीच्छेन्नियतव्रतः ॥
तेन यत्नेन कर्त्तव्या लक्ष्मणस्यापि विस्तरात् ।
श्रीराममन्त्रभेदास्तु बहवः सन्ति वै मुने ॥

तत्साधकैः सदा कार्या सौमित्रेरपि नित्यशः ।
अष्टोत्तरसहस्रं वा शतं वा सुसमाहितः ॥
लक्ष्मणस्य मनुर्जप्यो मुमुक्षुभिरतन्द्रितम् ।
अजप्त्वा लक्ष्मणमनुं राममन्त्रं जपन्ति ये ॥
तज्जप्तस्य फलं नैव प्रयान्ति कुशला अपि ।
अरिमित्रविधिः कोऽपि नैव कार्यो भवेदिह ॥
यो जपेल्लक्ष्मणमनुं नित्यमेकान्तमास्थितः ।
मुच्यते सर्वपापेभ्यः स कामानश्नुतेऽखिलान् ॥
प्रयोगायैव मन्त्रोऽयमुपदिष्टो हि शार्ङ्गिणा ।
सन्ध्याङ्गोपास्य विधिवन् मूलमन्त्रेण मन्त्रवित् ॥
त्रिकालं नियतो भूत्वा कृतनित्यविधिः स्वयम् ।
दीक्षायुतो यथान्यायं गुर्वनुज्ञापुरःसरम् ॥
मुच्यते सर्वपापेभ्यो याति विष्णोः परं पदम् ।
ऐहिकाननपेक्ष्यैवं निष्कामो योऽर्चयेद्विभुम् ॥
दीक्षां प्राप्य विधानेन गुरोर्विगतकल्मषात् ।
आचारादिरताद्दान्ताद् गृहस्थाद्विजितेन्द्रियात् ॥
तदनुज्ञानुसारेण पुरश्चर्या यथाविधि ।
स सर्वान् पुण्यपापौघान् दग्ध्वा निर्मलमानसः ॥
पुनरावृत्तिरहितं शाश्वतं पदमाप्नुयात् ।
सकामो वाञ्छितान् लब्ध्वा भुक्त्वा भोगान् यथेप्सितान् ॥
जातिस्मरश्चिरं भूत्वा याति विष्णोः परं पदम् ।
यथा श्रीराममन्त्राणां प्रयोक्तुः पापसम्भवः ॥
तथा नो लक्ष्मणमनोः किन्तु याति परां गतिम् ।
केचिन् मुक्त्यर्थमेव स्युः केचिदैहिकसाधनाः ॥
भुक्तिमुक्तिप्रदश्चाऽयमेको विज्ञायते परम् ॥ इति ॥ ८७-९६ ॥

आगे दोनों पार्श्व में (बायें एवं दाहिने) शार्ङ्ग धनुष तथा बाण की पूजा करे, उसके बाहर सुग्रीव सहित हनूमान् और विभीषण सहित श्री भरत की पूजा करे ॥ ८७ ॥

लक्ष्मण, अङ्गद, शत्रुघ्न एवं जाम्बवान् की चार दलों पर पूजा करे । आगे पुस्तक लेकर उसे बाचते हुये (उपदेश) करते हुये हनुमान् की पूजा करे ॥ ८८ ॥

दोनों पार्श्व में चामर धारण किये हुये भरत एवं शत्रुघ्न की पूजा करे और पश्चिम में दोनों हाथों से छत्र लगाये हुये श्री लक्ष्मण की पूजा करे ॥ ८९ ॥

इसके बाद पत्र के अग्रभाग में १. सृष्टि, २. जयन्त, ३. विजय, ४. सुराष्ट्र, ५. राष्ट्रवर्धन, ६. अकोप, ७. धर्मपाल तथा ८. सुमन्त—इन अष्ट प्रधान मन्त्रियों की पूजा करे ॥ ९० ॥

इसके बाद सर्वाभरण भूषित इन्द्रादि लोकपालों की पूजा करे । उसके बाहर उनके वज्रादि आयुधों की पूजा करे ॥ ९१ ॥

इस प्रकार की पूजा से जब मन्त्र सिद्ध हो जाय तब सभी अभीष्ट कर्मों के लिये इसका प्रयोग करना चाहिए । राजा को वश में करने के लिये चन्दन के जल से प्रसिञ्चित जाती पुष्प से होम करे । धन धान्यादि संपत्ति की प्राप्ति के लिये कमलों से पूजा करे । नीलोत्पल के होम से साधक समस्त विश्व को वश में कर लेता है ॥ ९२-९३ ॥

लक्ष्मी प्राप्ति के लिये साधक विल्व के फूलों से हवन करे । दूर्वा के होम से दीर्घायुष्य तथा नीरोगता प्राप्त होती है ॥ ९४ ॥

रक्त कमल के होम से मन्त्रज्ञ मनमाना धन प्राप्त करता है । बुद्धिमान् बनने के लिये नवीन खिले हुये पलाश पुष्पों का होम करना चाहिए ॥ ९५ ॥

इस मन्त्र से अभिमन्त्रित जल पीने से एक वर्ष के भीतर साधक कवि हो जाता है और इस मन्त्र से अभिमन्त्रित अन्न का भोजन करने से महान् आरोग्य का लाभ होता है ॥ ९६ ॥

### धारणयन्त्रम्

**तारं मध्ये विलिखतु मनुं षट्सु कोणेषु सन्धि-**
**ष्वङ्गं मायां स्मरमपि लिखेत्कोणगण्डेषु पश्चात् ।**
**किञ्जल्केषु स्वरगणमथो पत्रमध्येषु माला-**
**मन्त्रोत्थार्णान् गुहमुखमितानष्टमे पञ्च वर्णान् ॥ ९७ ॥**
**दशाक्षरेण संवेष्ट्य कादिवर्णैश्च भूपुरे ।**
**दिग्विदिक्षु लिखेद्बीजे नरसिंहवराहयोः ॥ ९८ ॥**

**धारणयन्त्रमाह तारमिति । मध्ये कर्णिकायां साध्यसाधककर्मसहितं प्रणवं लिखेत् । मनुं रामषडक्षरम् । सन्धिषु षट्सन्धिषु । अङ्गं षडङ्गमन्त्राः । कोणगण्डेषु कोणकपोलेषु । एकत्र मायाम् अपरत्र कामं लिखेत् । ततोऽष्टदलकेसरस्थाने षोडशस्वरान् लिखेत् । मालामन्त्रो वक्ष्यमाणः सप्तचत्वारिंशदक्षरः । गुहमुखमितान् षट्परिमितान् । दशाक्षरेण वक्ष्यमाणेन । कादिवर्णैः संवेष्ट्येति सम्बन्धः । भूपुरे दिग्विदिक्षु बीजे लिखेदिति सम्बन्धः । नरसिंहबीजमग्रिमपटले वक्ष्यमाणम् । वराहबीजं वाराहमन्त्रे वक्ष्यमाणम् ॥ ९७-९८ ॥**

अब **धारण के लिये यन्त्र निर्माण का प्रकार** कहते हैं—

षट्कोण यन्त्र निर्माण कर मध्य कर्णिका में साध्य साधक और कर्म सहित प्रणव मन्त्र लिखे । छः कोणों में राम मन्त्र के षडक्षरों को लिखे और सन्धि में षडङ्गमन्त्रों (द्र. १५. ८३) को लिखे । कोण के कपोलों पर एक ओर माया (ह्रीँ) तथा दूसरी ओर काम (क्लीँ) लिखे । पुनः अष्टदल के केशरों पर दो दो के क्रम से षोडश अक्षरों को लिखे । पुनः अष्टपत्र के मध्य में ४७ अक्षरों वाले वक्ष्यमाण माला (१४. ९९-१००) मन्त्रों को इस प्रकार लिखे—सात पत्रों पर

छः छः अक्षर के क्रम से ४२ अक्षर, पुनः शेष पाँच अक्षर अष्टम पत्र पर लिखे। आगे कहे जाने वाले दशाक्षर मन्त्र (द्र. १४. १०१) से उसे संवेष्टित करे। भूपुर में कादि वर्णों को लिखे तथा दिशाओं में एवं कोणों में क्रमशः वक्ष्यमाण नरसिंह तथा वराह बीजों को लिखे। (नरसिंह बीज द्र. १६.३९ क्ष्रौँ) (वाराह बीज द्र. १५.१२८) ॥ ९८ ॥

मालामन्त्रः

**नमो भगवते ब्रूयाच्चतुर्थ्या रघुनन्दनम्।**
**रक्षोघ्नविषदायाऽन्ते मधुरादि समीरयेत् ॥ ९९ ॥**
**प्रसन्नवदनायेति पश्चादमिततेजसे।**
**बालाय पश्चाद्रामाय विष्णवे तदनन्तरम्।**
**प्रणवादि नमोऽन्तोऽयं मालामनुरुदीरितः ॥ १०० ॥**

मालामन्त्रमाह नम इति। रघुनन्दनाच्चचतुर्थी रघुनन्दनाय। प्रसन्नवदनाय अमिततेजसे इत्यत्र न सन्धिः। सप्तचत्वारिंशदक्षराणि यन्त्रे नियमितत्वात् अयं मालामन्त्रोऽपि स्वतन्त्रः। तदृष्यादिकं यथा—

मुनिः पितामहश्छन्दः सात्यनुष्टुप च देवता।
राज्याभिषिक्तो रामश्च बीजशक्ती तथा पुरा ॥
तारवाक्कामबीजैश्च सम्पुटं प्रजपेदमुम्।
शिरस्याननवृत्ते च भ्रूमध्येऽक्षिद्वयेऽपि च ॥
श्रोत्रयोर्घ्राणयोश्चैव गण्डयोरोष्ठयोरपि।
दन्तयोरास्यदेशे च दोःपत्सन्ध्यग्रकेषु च ॥
कण्ठे स्तने हृदि द्वन्द्वे पार्श्वयोः पृष्ठदेशतः।
जठरे नाभ्यधिष्ठाने गुह्ये वर्णान् प्रविन्यसेत्।
सप्तर्त्तुसप्तदशषड्रुद्रसंख्यैः षडङ्गकम् ॥

उद्भिन्ननीलशकलामलकान्तिमब्ज-
चापासिवाणकरमम्बुजपत्रनेत्रम्।
पीताम्बरं स्मितसुधामधुरं मुरारिं
सञ्चिन्तयेन् मिथिलराजसुतासहायम् ॥

जपेद्द्वादशलक्षं च ध्यात्वैवं विजितेन्द्रियः।
बैल्वैः फलैः प्रसूनैश्च पत्रैस्त्रिमधुसंयुतैः ॥
मधुरत्रययुक्तेन पयोऽन्नेन सिताम्बुजैः।
होमं दशांशतः कुर्यात्तथा सर्वत्र तर्पणम् ॥
प्राक्प्रोक्ते पूजयेत् पीठे मूर्त्तावावाह्य देवताम्।
प्रथमाङ्गावृतिः प्रोक्ता द्वितीया लक्ष्मणादिभिः ॥
नारदाद्यैस्तृतीया स्याल्लक्ष्म्याद्याभिस्तुरीयका।
चतुर्दिक्स्थैश्च सृष्ट्याद्यैः पञ्चमी लोकनायकैः ॥

षष्ठी वज्रादिभिः प्रोक्ता सप्तमीज्या प्रकीर्त्तिता ।
लक्ष्मणो भरतश्चैव शत्रुघ्नश्च हनूमता ॥
सुग्रीवः पञ्चमः प्रोक्तः षष्ठ उक्तो विभीषणः ।
अङ्गदः सप्तमः प्रोक्तो नीलोऽष्टम उदाहृतः ॥
नारदश्च वसिष्ठश्च वामदेवस्तृतीयकः ।
जाबालो गौतमश्चापि भरद्वाजोऽथ कश्यपः ॥
वाल्मीकिश्चाष्टमः प्रोक्तो लक्ष्मीश्चापि सरस्वती ।
रतिप्रीती कीर्त्तिकान्ती तुष्टिपुष्टी इमाः क्रमात् ॥
सृष्टिर्जयन्तविजयौ सिद्धार्थः कार्यसाधकः ।
अशोकश्चैव पूर्वस्यां श्रीवत्सश्च गदा तथा ॥
पाञ्चजन्यः कौस्तुभाख्यो वनमाला च दक्षिणे ।
उत्तरे चक्रपद्मे च शार्ङ्गबाणाश्च खड्गकाम् ॥
पश्चिमे धर्मगरुडधर्मपालसुमन्त्रकान् ॥ इति ॥ ९९-१०० ॥

अब १४.९७ में कहे गये **माला मन्त्र का उद्धार** कहते हैं—

सर्वप्रथम् 'नमोभगवते', तत्पश्चात् रघुनन्दन शब्द की चतुर्थी (अर्थात् रघुनन्दनाय), तदनन्तर 'रक्षोध्नविषदाय', इसके अन्त में 'मधुर प्रसन्न वदनाय', पश्चात् 'अमिततेजसे', पुनः 'बालाय रामाय विष्णवे' लगावे । इसके अन्त में 'नमः' तथा आदि में प्रणव का प्रयोग करे । इस प्रकार हमने यहाँ माला मन्त्र का उद्धार कहा। यह मन्त्र ४७ अक्षरों का होता है ।

इसका **स्वरूप** इस प्रकार होगा—'ॐ नमो भगवते रघुनन्दनाय रक्षोघ्न-विषदाय मधुरप्रसन्नवदनाय अमिततेजसे बालाय रामाय विष्णवे नमः' ('वदनायामित तेजसे' में सन्धि हो जाने से गणना में ४६ होता है) ॥ ९९-१०० ॥

दशाक्षरमन्त्रः

**जानकीवल्लभायाऽथ भवेत् पावकवल्लभा ।**
**हृदादिरेषः कथितो राममन्त्रो दशाक्षरः ॥ १०१ ॥**

दशाक्षरोऽपि स्वतन्त्रो मन्त्रः । तदृष्यादिकं यथा—

दशाक्षरोऽयं मन्त्रोऽस्य वसिष्ठः स्यादृषिर्विराट् ।
छन्दस्तु देवता रामः सीतापाणिपरिग्रही ॥
आद्यं बीजं द्वितः शक्तिः कामेनाङ्गानि पूर्ववत् ।
शिरोललाटभ्रूमध्य तालुकण्ठेषु हृद्यपि ॥
नाभ्यन्धुजानुपादेषु दशार्णान् विन्यसेन्मनोः ।
अयोध्यानगरे चित्रसर्वसौवर्णमण्डपे ॥
मन्दारपुष्पैराबद्धविताने तोरणाञ्चिते ।
सिंहासने समारूढं पुष्पकोपरि राघवम् ॥
रक्षोभिर्हरिभिर्मौलैर्दिव्ययानगतैः शुभैः ।

संस्तूयमानं मुनिभिः प्रह्वैश्च परिसेवितम् ॥
सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपसेवितम् ।
श्यामं प्रसन्नवदनं सर्वाभरणभूषितम् ॥
ध्यानान्ते च जपेन्मन्त्रं वर्णलक्षं विचक्षणः ।
दशांशं जुहुयाद्बैल्वैः फलैर्मधुरसंयुतैः ॥ इति ॥

अस्य पूजा षडक्षरवदेव ज्ञेया ॥ १०१ ॥

'हुँ जानकीवल्लभाय स्वाहा' इस प्रकार का यह राम का दश अक्षरों का मन्त्र कहा जाता है ॥ १०१ ॥

**जपादिसाधितं यन्त्रं स्वर्णपट्टादिकल्पितम् ।**
**बाहुना विधृतं दद्याद्विजयश्रीपराक्रमान् ॥ १०२ ॥**

जपादीति आदिशब्देन पूजासम्पातौ । स्वर्णपट्टादिकल्पितमित्यादिशब्देन रजत-ताम्रभूर्जपत्राणि । तत्तल्लेख्यविशेषे कालविशेषोऽपि ।

यदगस्तिसंहितायाम्—

यावज्जीवं तु सौवर्णे रौप्ये विंशतिवार्षिकम् ।
भूर्जे द्वादशवर्षाणि तदर्धं ताम्रपत्रके ॥
एवं लेख्यविशेषेण यन्त्रसिद्धिः प्रतिष्ठिता ॥ इति ।

इदं गदितं विधानं राममन्त्रस्य राम इति द्व्यक्षरस्य मन्त्रस्य ज्ञेयमिति शेषः ।

वह्निर्नारायणेनाढ्यो जठरः केवलोऽपि च ।
द्व्यक्षरो मन्त्रराजोऽयं भुक्तिमुक्तिफलप्रदः ॥
एकाक्षरोक्तमृष्यादि स्यादाद्येन षडङ्गकम् ।
तारमायारमानङ्गवाक्स्वबीजैस्तु षड्विधः ॥
द्व्यक्षरो मन्त्रराजः स्यात् सर्वाभीष्टफलप्रदः ।
द्व्यक्षरश्चन्द्रभद्रान्तो द्विविधश्चतुरक्षरः ॥
ऋष्यादि पूर्ववत् ज्ञेयमेतेषां तु विचक्षणैः ॥ इति ॥ १०२ ॥

स्वर्ण, रजत, ताम्र एवं भूर्जपत्र पर यन्त्र लिखना चाहिए । जपादि से उसे सिद्ध करना चाहिए, तदनन्तर बाहु में धारण करना चाहिए । ऐसा करने से यन्त्र विजय श्री तथा पराक्रम प्रदान करता है ॥ १०२ ॥

वराहमन्त्रः

**गदितं राममन्त्रस्य विधानं सुरपूजितम् ।**
**तारं नमो भगवते वराहपदमीरयेत् ॥ १०३ ॥**
**रूपाय भूर्भुवःस्वः स्यात् पतये तदनन्तरम् ।**
**भूपतित्त्वं मे पदान्ते देह्यन्ते च ददापय ॥ १०४ ॥**
**वह्निजायावधिर्मन्त्रः स्यात् त्रयस्त्रिंशदक्षरः ।**